Dharma is one of the means for attaining Mokṣa. It is, therefore, but proper that the Smṛtis which deal with Dharma should emphasise Ātma-Jñāna and declare that it is the highest Dharma. At the beginning of Manusmṛti, (मनुस्मृति) Manu Says :—

"आसीदिदं तमो भूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः" ॥
"सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।
समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति" ॥
"उत्पत्तिरेव विप्रस्य मूर्तिर्धर्मस्य शाश्वती ।
सा हि धर्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते" ॥
"सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम् ।
तद्ध्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः" ॥
"प्रवृत्तं कर्म संसेव्य देवानामेति साम्यताम् ।
निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै" ॥
"सर्वमात्मनि संपश्येत् सच्चासच्च समाहितः ।
सर्वं ह्यात्मनि संपश्यन्नाधर्मे कुरुते मनः ॥
आत्मैव देवताः सर्वाः सर्वमात्मन्यवस्थितम् ।
प्रशासितारं सर्वेषामणीयांसमणोरपि ।
रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम् ॥
एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम् ।
इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम् ॥
एष सर्वाणि भूतानि पञ्चभिर्व्याप्य मूर्तिभिः ।
जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत् ॥
एवं यस्सर्वभूतेषु पश्यत्यात्मानमात्मना ।
स सर्वसमतामेत्य ब्रह्माभ्येति परं पदम्" ॥

In YĀJÑAVALKYA SMṚTI (याज्ञवल्क्य स्मृतिः) Yājñavalkya says :—

"भूतात्मनस्तपोविद्ये बुद्धेर्ज्ञानं विशोधनम् ।
क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता" ॥
"द्वासप्ततिसहस्राणि हृदयादभिनिस्सृताः ।
हिताहितानामनाड्यस्तासां मध्ये शशिप्रभम् ॥
मण्डलं तस्य मध्यस्थ आत्मा दीप इवाचलः ।
स ज्ञेयस्तं विदित्वेह पुनराजायते न तु" ॥
"मलिनो हि यथाऽऽदर्शो रूपालोकस्य न क्षमः ।
तथाऽविपक्वकरणः आत्मज्ञानस्य न क्षमः" ॥
"आकाशमेकं हि यथा घटादिषु पृथग्भवेत् ।
तथाऽऽत्मैको ह्यनेकश्च जलाधारेष्विवांशुमान्" ॥
"यत एतानि दृश्यन्ते लिङ्गानि परमात्मनः ।
तस्मादस्ति परो देहादात्मा सर्वग ईश्वरः" ॥
"अव्यक्तमात्मा क्षेत्रज्ञः क्षेत्रस्यास्य निगद्यते ।
ईश्वरस्सर्वभूतस्थः सन्नसन्सदसच्च यः" ॥

DAKṢA (दक्ष) in his Smṛti says :—

"यश्चात्मनिरतो नित्यमात्मक्रीडस्तथैव च ।
आत्मनिष्ठश्च सततमात्मन्येव स्वभावतः ॥
रतश्चैव स्वयं तुष्टस्संतुष्टो नान्यमानसः ।
आत्मन्येव सुतृप्तोऽसौ योगस्तस्य प्रसिद्ध्यति" ॥
"य आत्मव्यतिरेकेण द्वितीयं नैव पश्यति ।
ब्रह्मीभूय स एवं हि दक्षपक्ष उदाहृतः ॥
वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञं परमात्मनि ।
एकीकृत्य विमुच्येत योगोऽयं मुख्य उच्यते" ॥
"द्वैतपक्षं समास्थायाद्वैते तु व्यवस्थितः ।
अद्वैतिनां प्रवक्ष्यामि यथा धर्मः सुनिश्चितः ॥
तत्रात्मव्यतिरेकेण द्वितीयं यदि पश्यति ।
ततश्शास्त्राण्यधीयन्ते श्रूयन्ते ग्रन्थसंचयाः" ॥

THE DHARMASŪTRAS (धर्मसूत्रम्)

We find Āpastamba (आपस्तम्ब) saying in his Dharmasūtras :—

"आत्मलाभान्न परं विद्यते पूः प्राणिनः सर्वं एव गुहाशयस्याहन्यमानस्य विकल्मषस्याचलं चलनिकेतं येऽनुतिष्ठन्ति तेऽमृताः। सर्वभूतेषु यो नित्यो विपश्चिदमृतो ध्रुवः। अनङ्गोऽशब्दोऽशरीरोऽस्पर्शश्च महान् शुचिः। स सर्वं परमा काष्ठा स वैषुवतं स वै वैभाजनं पुरम्॥" "तं योऽनुतिष्ठेत्सर्वत्र प्राध्वं चास्य सदा चरेत्। दुर्दर्शं निपुणं युक्तो यः पश्येत् स मोदेत विष्टपे॥ आत्मन् पश्यन् सर्वभूतानि न मुह्येच्चिन्तयन् कविः। आत्मानं चैव सर्वत्र यः पश्येत् स वै ब्रह्मा नाकपृष्ठे विराजति"॥

Bodhāyana (बोधायन) says that everything is Brahma.

'ओमिति ब्रह्म ब्रह्मवा एष ज्योतिः य एष ज्योतिः य एष तपति एष वेदो य एष तपति वेद्यमेवैतत्। यदेष तपति एवमेवैष आत्मानं तर्पयति आत्मने नमस्करोति आत्मा ब्रह्म आत्म ज्योतिः।'

(d) ARTHAŚĀSTRA (अर्थशास्त्रम्)

Even in the Arthaśāstra (Political Science), we find in Śukranīti (शुक्रनीति) an early work on Arthaśāstra, a passage which says that Brahman is one without a second; all else that appears is only due to Māyā.

"ब्रह्मैकमद्वितीयं स्यात् नेह नानाऽस्ति किंचन।
मायिकं सर्वमज्ञानादिति वेदान्तिनां मतम्"॥

VYĀKARAṆA (व्याकरणम्)

Vyākaraṇa is one of the six Vedāṅgas. It primarily aims at elucidating the exact meanings of Vedic passages. The exponents of this Śāstra make it clear that not only the Vedāntic conception, but their own conception of Truth is Advaitic. Nandikeśvara while explaining the Māheśvara sūtra "अइउण्" states that the "Akāra" (अकार) is the All-Pervading Nirguṇa Brahman, which is Isvara, and with the Cit 'Ikāra' (इकार) it takes the form of Jagat. Akāra (अकार) is the effulgent Brahman, Parameśvara and is Pure Jñapti (ज्ञप्ति) (intelligence). Ikāra (इकार) which is Citkalā, in the presence of Akāra, becomes the cause of the Universe. Ukāra (उकार) is Viṣṇu.

Nandikeśvara says :

"अकारो ब्रह्मरूपस्स्यान्निर्गुणस्सर्ववस्तुषु।
चित्कलामिं समाश्रित्य जगद्रूप उणीश्वरः॥
अकारः सर्ववर्णाग्र्यः प्रकाशः परमेश्वरः।
आद्यमन्त्येन संयोगादहमित्येव जायते॥
सर्वं परात्मकं पूर्णं ज्ञप्तिमात्रमिदं जगत्।
ज्ञप्तेर्वभूव पश्यन्ती मध्यमा वाक्ततस्स्मृता॥
अकारो ज्ञप्तिमात्रं स्यादिकारः चित्कला स्मृता।
अकारं सन्निधीकृत्य जगतां कारणत्वतः।
उकारो विष्णुरित्याहुः व्यापकत्वान्महेश्वरः"॥

Patañjali (पतञ्जलि) the author of the Vyākaraṇa Mahābhāṣya, (महाभाष्यम्) the most famous and the foremost of all classical works, when explaining the Vārttika on the Sūtra स्त्रियाम् reads 'असत्तु मृगतृष्णावद् गन्धर्वनगरं यथा' and says :

"कथं पुनरसल्लिङ्गं शक्यं द्रष्टुम्। मृगतृष्णावत्। तद्यथा मृगास्तृषिताः अपां धाराः पश्यन्ति, न च तास्सन्ति। यथा गन्धर्वनगराणि दूरतो दृश्यन्ते, उपसृत्य च नोपलभ्यन्ते"

Here the Mirage or Mṛgatṛṣṇā, (मृगतृष्णा) the oft-quoted example of false objects (mithyā) according to Advaita conception, is clearly brought out by Patanjali as one which merely appears but is not real. The Advaitic conception of falsity or Mithyātva i. e. Mṛgatṛṣṇā or Rajju-Sarpa (रज्जुसर्प) is different from the idea of Vandhyā-Putra (वन्ध्यापुत्र) (barren woman's son) technically named Tuccha (तुच्छ) as the latter never appears as existing, whereas the former has a semblance of existence for a while, though really non-existing. When commenting upon the sūtra वर्तमाने लट् Patañjali quoting an ancient śloka

"न वर्तते चक्रमिषुर्न पात्यते न स्यन्दन्ते सरितस्सागराय।
कूटस्थोऽयं लोको न विचेष्टितास्ति यो ह्येनं पश्यति सोऽप्यनन्धः"॥[1]

expresses the idea that the world is in reality the Kūṭastha Brahman which is in reality devoid of all agency in consequence of its being the All (Pūrṇa).

---

१. अत्र कैयटः—'एवं यो वेत्ति सोऽप्यनन्धः। किं पुनर्योऽनुष्ठाता योगीत्यर्थः। स ह्यविकृतमात्मतत्त्वं भावयन्प्रत्यक्षीकरोतीत्यर्थः। तथाचोक्तं भगवता—'ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः। तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्॥' इति।

When commenting upon the sūtra कर्मवत्कर्मणा तुल्यक्रिय: Patañjali says: 'हन्त्यात्मानमात्मा। आत्मना हन्यत आत्मेति। क: पुनरात्मानं हन्ति को वाऽऽत्मना हन्यते। द्वावात्मानावन्तरात्मा शरीरात्मा च। अन्तरात्मा तत्कर्म करोति येन शरीरात्मा सुखदु:खे अनुभवति। शरीरात्मा तत्कर्म करोति येनान्तरात्मा सुखदु:खे अनुभवति।'

Here Patañjali suggests that the soul, when it identifies itself with the mind (Antūratman) (अन्तरात्मा), becomes the subject and that when the same soul becomes identified with the body (Śarīrātman) (शरीरात्मा) it becomes the object. The soul, identified with the body, becomes the subject, and the same soul, identified with the mind, becomes the object, thus he brings out the Advaitic truth that the one Ātman can be experienced both as subject and object at the same time in consequence of its dual projection and plurality itself should be essentially unreal.

In his Vākyapadīyakārikā Bhartṛhari says :—

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यत:" ॥
"स्वरूपज्योतिरेवान्त: परा वागनपायिनी।
तस्यां दृष्टस्वरूपायामधिकारो निवर्तते" ॥
"तस्मात्सर्वमभावो वा भावो वा सर्वमिष्यते।
न त्ववस्थान्तरं किंचिदेकस्मात्तत्त्वत: स्थितम्" ॥
"यत्र द्रष्टा च दृश्यं च दर्शनं चापि कल्पितम्।
तस्यैवार्थस्य सत्यत्वमाहुस्त्रय्यन्तवेदिन:" ॥
"वाच्या सा सर्वशब्दानां शब्दाच्च न पृथक्तत:।
अपृथक्त्वेऽपि संबन्धस्तयोर्जीवात्मनोरिव" ॥
"निर्भासोपगमो योऽयं क्रमवानिव दृश्यते।
अक्रमस्यापि विश्वस्य तत्कालस्य विचेष्टितम्" ॥
"संबन्धिभेदात्सत्तैव भिद्यमाना गवादिषु।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिता:" ॥
"तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते।
सा नित्या सा महानात्मा तामाहुस्त्वतलादय:" ॥
"सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ।
सत्यं यत्तत्र सा जाति: असत्या व्यक्तयो मता:" ॥

THE NYĀYA and VAIŚEṢIKA ŚĀSTRAS (न्यायवैशेषिकशास्त्रे)

Sage Gautama is the founder of the Nyāya school of philosophy. Nyāya generally goes with the Vaiśeṣika school, whose founder is Kaṇāda. Sage Gautama, while dealing with liberation or Apavarga in the beginning of his work, says :

"दु:खजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्ग:"।

This Sūtra is cited by Śrī Śaṅkarācārya, in his Brahmasūtrabhāṣya, as stressing the point of the Advaita truth, that the removal of false notions or Mithyājñāna through the realization of truth (Tattvajñāna) leads to liberation or Apavarga. Though his school endorses the idea that the universe is real, yet in the matter of Mokṣa, Gautama is endorsing the Advaita idea inasmuch as he says that the destruction or annihilation of Mithyājñāna through Tattvajñāna or realization of the truth is the surest way to salvation (Mokṣa). Even this doctrine of the Absolute Reality of the world is seriously jeopardised by Gautama's Bhāṣyakāra Vātsyāyana who goes so far as to say that the doctrine is intended only for those who have not attained ultimate realization and that the Nyāya doctrine only serves as a step to that realization. The Sūtras

"यमनियमाभ्यामात्मसंस्कारो योगाद्यात्मविध्युपायै:"

'तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत्' ('अनुत्पन्नतत्त्वज्ञानानामप्रहीणदोषाणां तदर्थं घटमानानामुपायार्थैतत्' इति वात्स्यायनभाष्यम्)

show that the Nyāya system serves only as a defensive hedgerow that nurtures the tender sapling of the Ultimate Truth. Vātsyāyana in his Bhāṣya explains these sūras as signifying that this system is but a step for those who have not realised the Ultimate Truth on account of their mind not having been purged of sins (but who in some way or other are striving towards such realisation).

'अनुत्पन्नतत्त्वज्ञानानामप्रहीणदोषाणां तदर्थं घटमानानामुपायार्थैतत्'

Kaṇāda in his sūtras 'सदकारणवन्नित्यम्' 'तस्य कार्यं लिङ्गम्' establishes the existence of paramāṇus (atoms).

Praśastapāda in his Bhāṣya on the Vaiśeṣika Sūtras, says that it is by the union of two paramāṇus that a dvyaṇuka is formed.

'यदा पार्थिवाप्ययोरण्वो: संयोगे सत्यन्येन पार्थिवेन पार्थिवस्यान्येनाप्येन चाप्यस्य युगपत्संयोगौ भवत:, तदा ताभ्यां संयोगाभ्यां पार्थिवाप्ये द्व्यणुके युगपदारभ्येते'

If two things are to come together they can do so only if they have parts (avayavas). But the Vaiśeṣikas deny parts (avayavas) to the Paramāṇu. Then how can two paramāṇus combine together to form dvyaṇuka ? In order to establish that a dvyaṇuka is formed by the union of two paramāṇus, they have to suppose that there are parts (avayava) where there are none ; that is to say, they *assume* the existence of a thing which does not really exist. This *assumption* of theirs comes nearer to the Advaita doctrine which says that what is not real *appears* to be so.[1]

Udayanācārya, a very great authority on Nyāya (Nyayācārya) in the passage "तदास्तां तावत् किमार्द्रकवणिजो वहित्रचिन्तया' compares his own system with Advaita and says that his own system is like a petty ginger-monger, whereas Advaita is like a ponderous seagoing vessel laden with cargo of permanent value. Again, when he says 'शुद्धबुद्धस्वभाव इत्यौपनिषदाः' ; he is of the firm opinion that the Advaitins alone are the Aupaniṣadas, i. e. the followers of the Upaniṣads, and not the followers of other systems, because he mentions Śaivas and Vaiṣṇavas as being different from the Aupaniṣadas. When he says 'तद्वाधकै बलिनि वेदनये जयश्रीः' he gives it as his settled opinion that the palm of victory (जयश्रीः) would go to the Advaita (Anirvacanīya-vāda) which alone is Vedanaya or the philosophy of the Vedas. Thus, according to Udayanācārya, Advaita alone is the real purport of the Vedas. After exhorting them (the Bauddhas) to get themselves absorbed in Advaita, where intellect itself is merged in the Supreme, he suggests to them as an alternative, to remain in the intellectual plane according to the Nyāya system, through alerting the tardiness of their intellect. Finally he says :

"ततः संस्काराभिभवात् केवलोऽपि न विकल्प्यते। यमाश्रित्य चरमवेदान्तोपसंहारः"। तत्प्रतिपादनार्थं "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह इत्यादि। सा चावस्था न हेया मोक्षनगरगोपुरायमाणत्वात्। निर्वाणं तु तस्य स्वयमेव। यामाश्रित्य न्यायमतोपसंहारः। 'अथ यो निष्काम आप्तकाम आत्मकामः स ब्रह्मैव सन् ब्रह्माप्येति, न तस्य प्राणा उत्क्रामन्ति अत्रैव समवलीयन्ते' इत्यादीनि"

Here he states his view that the Jīvanmukti of Advaita is like a lofty spire ornamenting the city of Mokṣa. The Nyāya system finds its culmination only by allying itself with Advaita. Thus we find that Udayanācārya is of opinion that Advaita is the Highest Truth. In Kiraṇāvali he says "As regards the view of the Vedāntins that, when ignorance is destroyed Ātman alone exists in Mokṣa, we have nothing at all to say against it."

'अविद्यायां निवृत्तायां केवलमात्मैवापवर्गे वर्तते' इति मते न नो विवादः ॥

THE PŪRVAMIMĀMSĀ (पुंर्वमीमांसा)

The purpose of the Pūrva Mīmāṁsā is to set forth rules of interpretation for reconciling the apparently conflicting texts of the Vedas and for elucidating the doubts that might arise in the course of performance of the sacrifices enjoined in them. Nobody will turn his attention to these sacrifices if he does not continue to live to enjoy the fruits thereof in the other world. Hence, they have to establish the existence of an Ātman different from the body, mind, and senses. Jaimini (जैमिनि) is the author of the Pūrva Mīmāmsā sūtras. Kumārila Bhaṭṭa (कुमारिलभट्ट), the Mīmāmsā Vārttikakāra (वार्त्तिककार) and the founder of the popular school of Pūrva Mīmāmsā, tells us, in the course of explaining the nature of the soul, that the Mīmāmsā Bhāṣyakāra deals only with the existence of soul, as being different from body, but not with its absotlute nature, because he is there concerned only with refuting atheistic Buddhists and that, for the realisation of the true nature of the Ātman, which is vibhu (विभु) all-pervading (ज्ञानशक्तिस्वभावोऽतो नित्यः सर्वगतः पुमान्—श्लो. वा. आत्म. वादे श्लो.73.) the Vedānta alone should be studied.

"इत्याह नास्तिक्यनिराकरिष्णुः आत्मास्तितां भाष्यकृदत्र युक्त्या।
दृढत्वमेतद्विषयः प्रबोधः प्रयाति वेदान्तनिषेवणेन।" श्लो. वा. आत्मवादे श्लो. 148..

Prabhākara (प्रभाकर) the founder of the Guru-Mata (गुरुमत) of Pūrva Mīmāṁsā, throws direct light on the point. He says that the Mīmāṁsā Bhāṣyakāra i. e. Śabarasvāmī (शबरस्वामी) did not explain the true nature of the ego "I" and "Mine" which is only a result of the misconceived identity of the Ātmā with Anātmā (the matter) because Bhagavān Śrī Kṛṣṇa has given his injunction in the Gīta—"Do not perplex the undeveloped minds of the ignorant, who hold fast to Karma." Śabarasvāmī has not dwelt at length on this point not because of his ignorance

---

१—"अणौ निरंशे नितरां कल्पितं जगत्' इति (खण्डनकारश्लोक उपक्षिप्तः) निरंशेऽप्यणौ संयोगकल्पनायां सर्वथा जगतः कल्पितत्वमेवेति तद्भावः। कणादः पारिमाण्डल्यसंयोगात् द्व्यणुकक्रमात्। जगदुत्प्रेक्षयन् मायावादसादरमानसः ॥ इति प्रघट्टकान्तरे तदुक्तेः"

of the Truth, but on account of the direct injunction that those who are addicted to Karma are not to be perturbed by the preaching of the Upaniṣadic truth.

"यदुक्तं 'महङ्कारममकारी अनात्मनि आत्माभिमानी' इति,* मृदितकषायाणामेवैतत्कथनीयम्, न कर्मसङ्गिनामित्युपरम्यते। आह च भगवान् द्वैपायनः—'न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् इति रहस्याधिकारे। तस्मान्न विवृतमत्र भाष्यकारेण भगवता वचनानुरोधाज्ञानात्"

(h) THE YOGA AND SĀṄKHYA SYSTEMS (योगः सांख्यं च)

Yoga. Patañjali is the founder of the Yoga school of philosophy. Yoga is a means to bring about Advaita Sākṣātkāra (अद्वैतसाक्षात्कारः) through the intense concentration of the mind with which it largely deals. Patañjali says 'कृतार्थं प्रति नष्टमप्यनिष्टं तदन्यसाधारणत्वात्'. One of the most fundamental Siddhāntas of Advaita is that the objective world is an illusion (Mithyā). This view is accepted by Patañjali in the foregoing sūtra, which means that whatever appears does not exist for one who has realised the truth, but does exist for one who has not realised.

Vārṣagaṇya (वार्षगण्य) the expounder of Yoga, Says,

"गुणानां परमं रूपं न दृष्टिपथमृच्छति।
यत्तु दृष्टिपथं प्राप्तं तन्मायेव सुतुच्छकम्" ॥†

(i) Itihāsas (इतिहासाः)

THE RĀMĀYAṆA (रामायणम्)

Rāmāyaṇa (वाल्मीकिरामायण) In the Ayodhyā Kāṇḍā Vaśiṣṭha (वसिष्ठ) says to Rāma 'राम आकाशप्रभवो ब्रह्मा' meaning that Brahmā emanated from Ākāśa. In the Uttara Kāṇḍa, when requesting Rāma to return to his abode Brahma asks Rāma to enter into the Vaiṣṇava Tejas (Saguṇamūrti) (सगुणमूर्ति) or the Sanātana Ākāśa (सनातन आकाशः) (the all-pervading).

यामिच्छसि महाबाहो तां तनु प्रविश स्वकाम्।
वैष्णवीं तां महातेजो तद्वाकाशं सनातनम् ॥

Since Vaiṣṇava Tejas (वैष्णवतेजः) is mentioned as an alternative to Sanātana Ākāśa, we have to understand that in the eyes of Brahmā Ākāśa is equated with the Nirguṇa Brahma (the All-Pervading One).

In the Yuddha Kāṇḍa Brahmā praises Śrī Rāma and says 'अक्षरं ब्रह्म सत्यं च मध्ये चान्ते च राघव' and again न तदस्ति त्वया विना'

The word Satyam used as an adjective to Brahma implies that everything beside Brahma is not Satya. This is one of the principal tenets of Advaita. In the Sundara Kāṇḍa, Sīta says :—

"धन्याः खलु महात्मानो मुनयस्त्यक्तविरिक्षपाः।
जितात्मानो महाभागा येषां नस्तः प्रियाप्रिये॥
प्रियान्ते संभवेद्दुःखमप्रियादधिकं भयम्।
ताभ्यां हि ये वियुज्यन्ते नमस्तेषां महात्मनाम्" ॥

Here she illustrates, How a Jīvanmukta should live. The same idea is expressed in the Śruti beginning : 'न ह वै शरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति'

It is only when one realises the Advaitic Anubhava that He is all and that there is nothing else but He, that one can be free for ever from fear (Priya or Apriya). In the Uttara Kāṇḍa, when Yama approaches Rāma conveying to him Brahmā's request that he may return to Vaikuṇṭha, he says

'तवाहं पूर्वके भावे पुत्रः परपुरञ्जय।
माया संभावितो वीर कालस्सर्वसमाहरः।' ॥

and Brahmā himself when requesting Rāma to return to his abode, says :—

'संक्षिप्य हि पुरा लोकान् मायया स्वयमेव हि।
महार्णवे शयानोऽप्सु मां त्वं पूर्वमजीजनः ॥

---

* अत्र शावरभाष्यम्—आह परत्राप्यहंशब्दो भक्त्या दृश्यते—तद्यथा-'अहमेव पुत्रः अहमेवासौ देवदत्तः, अहमेव गच्छामि इति।

† Iśwara Kṛṣṇa who has condensed the Sānkhya Sūtras of Kapila in 70 verses says "तस्मान्न बध्यते नापि मच्यते नापि संसरति कश्चित्' Here he expresses the same idea as is elaborated by Śrī Gauḍapāda (गौडपाद) in his Maṇḍūkyā Kārika. (माण्डूक्यकारिका)

न निरोधो न चोत्पत्तिः न बद्धो न च साधकः।
न मुमुक्षुः न वै मुक्तः इत्येषा परमार्थता ॥

भोगवन्तं ततो नागमनन्तमुदकेशयम् ।
मायया जनयित्वा त्वं द्वौ च सत्वौ महाबलौ' ॥

The conception of Time is due to the relativity of Māyā. Māyā, mentioned in these verses, is a factor of Advaita only. Time, which is the cause of both creation and dissolution is a prominent feature of Advaita. This is clearly brought out in the foregoing verses. The dream-state is an oft-quoted illustration to explain the unreality of the world. This unreality of dreams is pointedly conveyed in the words of Bharata (भरत) and Maṇḍodarī (मण्डोदरी). Maṇḍodarī Says :—

"हा स्वप्नस्सत्यमेवेदं त्वं रामेण कथं हतः ।
त्वं मृत्योरपि मृत्युस्स्याः कथं मृत्युवशं गतः" ॥

Bharata says :—

"अश्रद्धेयमिदं लोके न सत्यं प्रतिभाति मा ।
मुह्यते खलु मे भावः स्वप्नोऽयमिति मे मतिः" ॥

THE ADHYĀTMA RĀMĀYAṆA (अध्यात्मरामायणम्):

The Adhyātma Rāmāyaṇa as the name implies, is full of philosophic ideas. We cite here only some references to such ideas. Sīta (सीता) explains ot Hanumān (हनुमान्) the true nature of Rāma and says that all actions are impelled by her alone though such actions were mistakenly attributed to Rāma.

"रामं विद्धि परं ब्रह्म सच्चिदानन्दमद्वयम् ।
सर्वोपाधिविनिर्मुक्तं सत्तामात्रमगोचरम् ॥
आनन्दनिर्मलं शान्तं निर्विकारं निरञ्जनम् ।
सर्वव्यापिनमात्मानं स्वप्रकाशमकल्मषम् ॥
मां विद्धि मूलप्रकृतिं सर्गस्थितित्यन्तकारिणीम् ।
तस्य सन्निधिमात्रेण सृजामीदमतन्द्रिता ॥
तत्सान्निध्यान्मया सृष्टं तस्मिन्नारोप्यते बुधैः" ॥

Again in another place, Rāma says :

"आकाशस्य यथा भेदस्त्रिविधो दृश्यते महान् ।
जलाशये महाकाशस्तदवच्छिन्न एव च ।
प्रतिबिम्बाख्यमपरं दृश्यते त्रिविधं नभः ॥
बुध्यवच्छिन्नचैतन्यमेकं पूर्णं तथा परम् ।
आभासस्त्वपरं बिम्बभूतमेवं त्रिधा भिदा" ॥
"ऐक्यज्ञानं यदोत्पन्नं महावाक्येन चात्मनोः ।
तदाऽविद्या स्वकार्येण नश्यत्येव न संशयः ॥"

Kausalyā's (कौसल्या) prayer to Rāma, Ahalyā's (अहल्या) prayer to Rāma, Paraśurāmā's (परशुराम) prayer to Rāma, in the Bālakāṇḍa, Nārada's (नारद) prayer to Rāma, Rāma's advice to Kausalyā and Lakṣmaṇa (लक्ष्मण) and Vasiṣṭhas's (वसिष्ठः) advice to Bharata are full of Advaitic truths. In the Uttara Kāṇḍa, Rāma advises Lakṣmaṇa in the following words :

"कदाचिदात्मा न मृतो न जायते न क्षीयते नापि च वर्धतेऽमरः ।
निरस्तसर्वातिशयस्सुखात्मकः स्वयंप्रभस्सर्वगतोऽयमद्वयः ॥
एवंविधे ज्ञानमये सुखात्मके कथं भवो दुःखमयः प्रतीयते ।
अज्ञानतोऽध्यासवशात्प्रतीयते ज्ञाने विलीयेत विरोधतःक्षणात् ॥"

THE ĀNADNA RĀMĀYAṆA (आनन्दरामायणम्) :

In the Ānanda Rāmāyaṇa also we find many Advaita truths. In Sāra Kāṇḍa (सारकांड) (5th Sarga) we find Rāma explaining Advaitic truths to Daśaratha (दशरथ). He says that the universe is only an appearance due to Māyā like the appearance of silver in the shell and of water in a mirage.

"नश्वरं भासते चैतत् विश्वं मायोद्भवं नृप ।
यथा शुक्तौ रौप्यभासः काचभूम्यां जलस्य च ॥
यथा रज्जौ सर्पत्रासः मृगतोये जलस्पृहा ।
तद्वदात्मनि भासोऽयं कल्प्यते नश्वरो बुधैः" ॥

In Yoga (योग) kāṇḍa (5th sarga), we read 'अद्वैतब्रह्मरूपाय चिन्मात्राय परात्मने।' and in the 7th sarga we read "यद्ब्रह्म परमं धाम सर्वलोकोत्तमोत्तमम् । निर्गुणं परमं सूक्ष्मम् "

In Vilāsa (विलास) Kāṇḍa (2nd Sarga), we read

"निरामयं निराभासं निरवद्यं निरञ्जनम् ।
नित्यानन्दं निराकारमद्वैतं तमसः परम् ॥
परात्परतरं नित्यं सत्यानन्दचिदात्मकम्" ।
"सर्वात्मकं सर्वगतस्वरूपं नमामि रामं परतः परस्तात्" ।

In Manohara (मनोहर) Kāṇḍa (2nd Sarga), we find the following Vākyas 'सर्वं ब्रह्म न संशयः' 'अहमेव परं ब्रह्म' 'मत्तो ब्रह्म परं न हि' 'एवं यद् दृश्यते चेदं मायेयं तव राघव' 'नश्वरं बुद्बुदाकारं ज्ञातं चेदं मया प्रभो'

In the fourth Sarga we find

"सर्वासूपनिषत्स्वेवं ब्रह्माद्वैतं सुनिर्मितम् ।
ब्रह्मैवेदममृतमित्याह चाथर्वणी श्रुतिः ।।
तत्त्वमेव त्वमेवैतदिति कैवल्यगं वचः ।
तत्त्वमसीतिच्छान्दोग्ये ब्रह्मात्मैक्यं न भेदधीः" ।।
"इदं सर्वं यदयमात्मैकमेवाद्वितीयकम् ।
सर्वं खल्विदमित्यादि श्रुतयो यद् ब्रुवन्ति हि" ।।

Non-difference between Hari and Hara is also one of the special features of Advaita. This also we find expressed in the 7th sarga of this Kāṇḍa.

"राम एव परो ज्ञेयः शिव एव रघूत्तमः ।
उभयोर्नान्तरं ज्ञेयं भेददृङ् नारकी नरः ।।
रामशङ्करयोरत्र भिन्नत्वं येन मानितम् ।
तस्य जन्म वृथागतम् ।।
शम्भोश्च हृदयं रामः रामस्य हृदयं शिवः ।
नैवान्तरं कल्पनीयम्" ।।

In the 12th sarga, Durgā says :

'रामस्साक्षान्महादेवः नात्र भेदः कदाचन'

THE MAHĀBHĀRATA

Besides the Bhagavadgīta (भगवद्गीता), Advaitic ideas are found in many other places in the Mahābhārata. In the 36th Adhyāya of the Mokṣadharma (मोक्षधर्म) explaining to Janamejaya जनमेजय the truth about Puruṣa (पुरुष) Vaiśampāyana (वैशंपायन) says that though the Sāṅkhyas postulate many Puruṣas, Vyāsa (व्यास) posits only one Puruṣa

"बहवः पुरुषा लोके सांख्ययोगविचारिणः ।
नैकमिच्छन्ति पुरुषं एकं कुरुकुलोद्वह ।।
इदं पुरुषसूक्तं हि सर्ववेदेषु पठ्यते ।
ऋतं सत्यं च प्रख्यातं ऋषिसिंहेन चिन्तितम् ।।
उत्सर्गेणापवादेन ऋषिभिः कपिलादिभिः ।
अध्यात्मचिन्तामाश्रित्य शास्त्राण्युक्तानि भारत ।।
समासतस्तु तद्व्यासः पुरुषैकत्वमुक्तवान्" ।

Brahmā says to Rudra :

'निर्गुणं निर्गुणा भूत्वा प्रविशन्ति सनातनम् ।'

In answer to a question by Suvarcalā (सुवर्चला) as to what is Ahaṁbhāva (अहंभाव) or Egoism and Ātmānubhava (आत्मानुभव) Śvetaketu says :

"मृन्मयो हि घटाभासः तादृग्भाव इहेष्यते ।
अहंभावः परेऽचिन्त्ये ह्यात्मभावो महान्पुनः ।।
न वाचस्तत्र विद्यन्ते इति नैव विरुध्यते ।।
त्वचा स्पृशति वै वायुमाकाशस्थं पुनः पुनः" ।
"तत्स्थं गन्धं तयाऽऽघ्राति ज्योतिः पश्यति चक्षुषा ।।
तमो रश्मिगणञ्चैव मेघजालं तथैव च ।
सर्वतारागणञ्चैव नाकाशं दृश्यते पुनः ।।
आकाशस्याप्यथाकाशं रुद्रूपमिति निश्चितम् ।
सदर्थे कल्पितं सर्वं तत्सत्यं विष्णुरेव च ।
कैवलज्ञानमात्रं तत्तस्मिन्सर्वं प्रतिष्ठितम्" ।।

Brahmā says to Rudra :—

"हित्वा गुणमयं सर्वं कर्म हित्वा शुभाशुभम् ।
उभे सत्यानृते त्यक्त्वा येन त्यजसि तत्त्यज" ।।

In the Viṣṇusahasranāma we find the names Tattvam (तत्त्वम्), Tattvavit (तत्त्ववित्), Ekātmā (एकात्मा), Janmamṛtyujarātigaḥ (जन्ममृत्युजरातिगः). Here we find the Advaitic truth that there is only one Truth ; that the Truth and the knower of the Truth are one and the same, and that one who realises this Oneness goes beyond the cycle of birth, death and old age, i. e. attains final bliss.

ŚIVA RAHASYA (शिवरहस्यम्)

Śiva Rahasya is considered as one of the epics. It consists of two parts, Jñāna Kāṇḍa (ज्ञान) and Upāsanā (उपासना) Kāṇḍa. That the only one exists (without a second) and that the One appears as many is expressed herein in the first Amśa ;

"ज्ञानमात्मा त्वहं ब्रह्म ज्ञानं शान्तिरनुत्तमा ।
स एकः परमात्मा हि नेह नानाऽस्ति किंचन" ॥
"यस्यैकत्वं हि विज्ञाय शोकं तरति मानवः ।
एकमेव महादेवमिन्द्रमित्रादिभिः सुरैः ॥
नामरूपगुणैश्चैव मायया मन्यते जनः" ॥
"इदं जगत्पुरा सृष्ट्वा तस्मिन् प्राविशदीश्वरः ।
व्याकुर्वन्नामरूपे तु व्यवहारीव भासते" ॥
"नेति नेति च वेदान्तैः तल्लिंगं प्रतिपाद्यते ।
तदेव ब्रह्म त्वं विद्धि नेह नानाऽस्ति किंचन" ।
"असत्यमेतच्च जडं स्वसत्यात् सत्यवत् स्थितम् ।
करोति च जडं सर्वं चेतनानां स चेतनः ॥
संगवानिव विश्वेशोऽसंगः सर्वान्तरङ्गकः ।
यस्य ज्ञानेन सर्वेषां मुक्तयः सर्वतो द्विजाः ॥
सर्वं शिवतया भाति प्रसादेन महेशितुः ।
स षोडशात्मा पुरुषो नेह नानाऽस्ति किंचन ॥"

In Ṛbhu (ऋभु) Gītā which forms part of the 6th Amśa, it is said that Vyāsa got the Brahma Sūtras from Śiva and that, in the Brahma Sūtras, he has taught that the universe is unreal. Some of the Sūtras are explained in the Ṛbhu Gīta itself ;

"व्यासा मन्वन्तरेषु प्रतियुगजनिताः शांभवा ज्ञानसिद्धैय
भस्माभ्यक्तसमस्तगात्रनिवहा रुद्राक्षमालाधराः ।
कैलासं समवाप्य शंकरपदध्यानेन सूत्राण्युमा-
कान्तात् प्राप्य वितन्वते स्वकधिया प्रामाण्यवादान्यहो" ॥

"जन्माद्यस्य यतोऽस्य चित्रजगतो मिथ्यैव तत्कारणं
ब्रह्म ब्रह्मात्मनैव प्रकृतिपरमदो वर्तमानं विवर्तेत् ।
श्रुत्या युक्त्या यतो वा इति पदघटितोद्बोधतो वक्ति शम्भं
नाणुः कालविपाककर्मजनिते ज्याचोदना वं मृषा ॥"

(i) THE PURĀṆAS (पुराणानि)

There are 18 Mahā purāṇas and 18 Upapurāṇas.

The Viṣṇu Purāṇa (विष्णुपुराणम्)

The Viṣṇu Purāṇa stresses Advaitic truths at every step and ends with the famous Advaitic Upākhyāna of Kāṇḍikya Janaka and Keśidhwaja Janaka.

ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः ।
तदेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम् ॥ (1-2-6)
परः पराणां परमः परमात्मात्मसंस्थितः ।
रूपवर्णादिनिर्देशविशेषणविवर्जितः ॥ (1-2-10)
जुषन् रजोगुणं तत्र स्वयं विश्वेश्वरो हरिः ।
ब्रह्मा भूत्वाऽस्य जगतः विसृष्टौ संप्रवर्तते ॥
सृष्टं च पात्यनुयुगं यावत्कल्पविकल्पना ।
सत्त्वभृद्भगवान् विष्णुरप्रमेयपराक्रमः ॥
तमोद्रेकी च कल्पान्ते रुद्ररूपी जनार्दनः ।
मैत्रेयाखिलभूतानि भक्षयत्यतिदारुणः ॥ (1-2-61, 62, 63)
मत्तः सर्वमहं सर्वं मयि सर्वं सनातने । (1-9-75)
यत्र सर्वं यतः सर्वं यः सर्वं सर्वसंश्रयः । (1-9-84)
शुद्धस्संलभ्यते भ्रान्त्या गुणवानिव योऽगुणः । (1-14-37)
अहमेवाक्षयो नित्यः परमात्माऽत्मसंश्रयः ।
ब्रह्मसंज्ञोऽहमेवास्मि तथाऽन्ते च परः पुमान् ॥ (1-19-86)
सकलमिदमहं च वासुदेवः परमपुमान् परमेश्वरः स एकः ।
यदा तु शुद्धं निजरूपि सर्वं कर्मक्षये ज्ञानमपास्तभेदम् ॥ (2-12-40)
तस्मान्न विज्ञानमृतेऽस्ति किंचित् क्वचित्कदाचिद्भूप वस्तु जातम् ।
विज्ञानमेकं निजकर्मभेदविभिन्नचित्तैर्बहुधाऽभ्युपेतम् ॥ (2-12-43)

सद्भाव एवं भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत् ।
एतत्तु सत्संव्यवहारभूतं तत्रापि चोक्तं भुवनाश्रितं ते ।। (2-12-45)

वस्तु राजेति यल्लोके यच्च राजभटादिकम् ।
तथान्यच्च नृपेत्थं तत्र सत् सङ्कल्पनामयम् ।। (2-13-93)

एको व्यापी समः शुद्धः निर्गुणः प्रकृतेः परः ।
जन्मवृद्ध्यादिरहितः आत्मा सर्वगतोऽव्ययः ।। (2-14-29)

तस्यात्मपरदेहेषु सतोऽप्येकमयं हि यत् ।
विज्ञानं परमार्थोऽसौ द्वैतिनोऽतथ्यदर्शिनः ।। (2-14-31)

तदेतदुपदिष्टं ते संक्षेपेण महामते ।
परमार्थसारभूतं यत्तदद्वैतमशेषतः ।। (2-16-18)

एकस्समस्तं यदिहास्ति किञ्चित्तदच्युतो नास्ति परं ततोऽन्यत् ।
सोऽहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहम् ।। (2-16-23)

सितनीलादिभेदेन यथैकं दृश्यते नभः ।
भ्रान्तदृष्टिभिरात्माऽपि तथैकोऽपि पृथक्पृथक् ।। (2-16-29)

अविद्यामोहितात्मानः पुरुषा भिन्नदर्शिनः ।
वदन्ति भेदं पश्यन्ति चावयोरन्तरं हर ।। (5-33-49)

संज्ञायते येन तदस्तदोषं शुद्धं परं निर्मलमेकरूपम् ।
सन्दृश्यते वाप्यवगम्यते वा तज्ज्ञानमज्ञानमतोऽन्यदुक्तम् ।। (6-5-87)

निर्वाणमय एवायमात्मा ज्ञानमयोऽमलः ।
दुःखाज्ञानमयो धर्माः प्रकृतेस्ते तु नात्मनः ।। (6-7-22)

प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ।। (6-7-53)

तद्भावभावमापन्नस्ततोऽसौ परमात्मना ।
भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत् ।। (6-7-95)

विभेदजनके ज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ।। (6-7-96)

In Garuḍa Purāṇa (गरुडपुराण) (Ācāra Khaṇḍa) we read :—

"सर्पधारादिभिर्भेदैरन्यथा वस्तुकल्पनम् ।
व्योमादिनामरूपाद्यैरन्यथाऽऽत्मा प्रकल्प्यते ।।
प्रत्यक्षमपि यद्द्रव्यं दुर्दर्शमिति भाष्यते ।
तथाहि रज्जुरुरगः शुक्तिकारजतं यथा ।।
आदावन्ते न सन्त्येव नामरूपक्रियादयः ।
सत्त्वावकल्पनं काले न सन्ति परमार्थतः ।।
मायाविचारसिद्धैव विचारेण विलीयते ।
आपातरमिता सापि कल्पनाकालवर्तिनी" ।।

"अहं ब्रह्म परं ज्योतिः विष्णुरित्येव चिन्तयेत् ।
ब्रह्मात्मनोर्यदेकत्वं स योगश्चोत्तमो मतः ।।
सोऽहमस्मीति मोक्षाय नान्यः पन्था विमुक्तये ।
व्यापकत्वात्कथं याति को याति क्व स याति च ।।
अनन्तत्वान्न देशोऽस्ति अमूर्तत्वाद्गतिः कुतः ।
अद्वयत्वान्न कोऽप्यस्ति बोधत्वाज्जडता कुतः ।।
कथमाकाशकल्पस्य गतिरागतिसंस्थिती ।
जाग्रत्स्वप्नसुषुप्तं च मायया परिकल्पितम्" ।।

"अहं ब्रह्म परं तत्त्वं ज्ञात्वा त्वखिलविद्भवेत् ।
यथैकमृण्मये ज्ञाते सर्वमेतच्चराचरम् ।।
यथैकहेममणिना सर्वं हेममयं भवेत् ।।
ज्ञातं तथैवमीक्षेन ज्ञानिनाऽप्यखिलं जगत् ।
यथान्धकारदोषेण रज्जुस्सम्यङ् न दृश्यते ।।
तथा संमोहदोषेण चात्मा सम्यङ्न दृश्यते" ।

"यथा रथादयः स्वप्ने सन्तो नैव च सत्यतः ।।
तथा जाग्रदवस्थायां भूतानि न तु सन्निधौ ।
द्वैरूप्यं मायया भाति जाग्रत्स्वप्नपदज्ञयोः ।।
एवमेतत्परं ब्रह्म स्वप्नजाग्रत्पदद्वये ।
सुषुप्तमचलं रूपमद्वयं पदमुच्यते" ।।

"ज्ञानादज्ञानकार्यस्य निवृत्त्या मुक्तिरैक्यतः ।
सा मुक्तिर्ब्रह्मणा चैक्यमनैक्यं प्राकृतैर्गुणैः" ।।

"वेदाहमेतं पुरुषं चिद्रूपं तमसः परम् ।
सोऽहमस्मीति मोक्षाय नान्यः पन्था विमुक्तये ।।
श्रवणं मननं ध्यानं ज्ञानानां चैव साधनम् ।
एकेन जन्मना ज्ञानान्मुक्तिर्नं द्वैतभाविनाम् ।।
यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ।
तदामृतत्वमाप्नोति जीवन्नेव न संशयः ।।
अहं ब्रह्मेत्यवस्थानं समाधिरभिधीयते ।।
अहं ब्रह्मास्मिवाक्योत्थज्ञानान्मोक्षो भवेन्नृणाम् ।।
वाक्यज्ञानं भवेज्ज्ञानादहंब्रह्मपदार्थयोः ।
पदद्वयार्थौ द्विविधौ वाच्यौ लक्ष्यौ स्मृतौ बुधैः ।
वाक्यवाच्यश्च शबलः लक्ष्यः शुद्धः प्रकीर्तितः" ।।

"ज्ञानादज्ञानकार्यस्य निवृत्त्या मुक्तिरैक्यतः ।
जीवत्ववर्जितःप्राप्तचैतन्यानुस्वरूपतः ।।
अहं ब्रह्मास्मि निर्लेपमहं ब्रह्मास्मि सर्वगम् ।
सा मुक्तिर्ब्रह्मणा चैक्यमनैक्यं प्राकृतैर्गुणैः" ।।

In the Nāradiya Purāṇa (नारदीयपुराण) we find :

"नासद्रूपा न सद्रूपा माया नैवोभयात्मिका ।
अनिर्वाच्या ततो ज्ञेया भेदबुद्धिप्रदायिनी ।।
मायैवाज्ञानभेदेन बुध्यते मुनिसत्तम ।
अज्ञानं नाशयेद्योगी योगेन मुनिसत्तम ।।
तन्नाशे निर्मलं ब्रह्म प्रकाशयति पण्डितः" ।

"यतो वाचो निवर्तन्ते न मनो यत्र संविशेत् ।
तद्विद्यादात्मनो रूपमसङ्गस्य चिदात्मनः ।।
यस्य सत्यतयासत्यं जगदेतद्विकाशते ।
निरञ्जनात्समुत्पन्नं जगदेतच्चराचरम् ।।
तिष्ठत्यप्येति वा यस्मिंस्तत्सत्यं ज्ञानमद्वयम् ।
ब्रह्माद्वितीयं तद्वन्दे नामरूपक्रियास्पदम्" ।।

"आत्मानं द्विविधं प्राहुः परापरविभेदतः ।
परस्तु निर्गुणः प्रोक्तो ह्यहङ्कारयुतोऽपरः ।।
तयोरभेदविज्ञानं योग इत्यभिधीयते ।
यदा त्वभेदविज्ञानं जीवात्मपरमात्मनोः ।
भवेत्तथा मुनिश्रेष्ठ पाशच्छेदोऽपरात्मनः ।।
एकः शुद्धोऽक्षरो नित्यः परमात्मा जगन्मयः ।
नृणां विज्ञानभेदेन भेदवानिव लक्ष्यते ।।
कर्तृत्वं नापि भोक्तृत्वं निर्गुणस्य परात्मनः" ।

"मायिनो मायया भेदं पश्यन्ति परमात्मनि ।
तस्मान्मायां त्यजेद्योगान्मुमुक्षुर्द्विजसत्तम ।।
ध्यानं ध्येयं ध्यातृभावं यथा नश्यति निर्भरम् ।
ततोऽमृतत्वं भवति ज्ञानामृतनिषेवणात् ।।
उपाधिरहितं ब्रह्म स्वप्रकाशं निरञ्जनम् ।
अहमेवेति निश्चित्य परां शान्तिमवाप्नुयात्" ।।

"एको व्यापी समः शुद्धः निर्गुणः प्रकृतेः परः ।
वेणुरन्ध्रादिभेदेन भेदः षड्जादिसंज्ञितः ।।
अभेदो व्यापिनो वायोस्तथा तस्य महात्मनः ।
एकत्वं रूपभेदश्च बाह्यकर्मप्रवृत्तिजः ।।
देवादिभेदमध्यास्ते नास्त्येवावरणो हि सः" ।

In the Kūrma Purāṇa (कूर्मपुराणे) we find :

"न कर्ता न च भोक्ता वा नच प्रकृतिपूरुषौ ।
न माया नैव च प्राणाः न चैव परमार्थतः ।।
यथा प्रकाशतमसोः संबन्धो नोपपद्यते ।
तद्वदैक्यं न संबन्धः प्रपञ्चपरमात्मनोः ।।
अहं कर्ता सुखी दुःखी कृशः स्थूलेति या मतिः ।
सा चाहंकारकर्तृत्वादात्मन्यारोपिता जनैः ।।

तस्मादज्ञानमूलो हि संसारः सर्वदेहिनाम् ।
तेनायं संगतस्त्वात्मा कूटस्थोऽपि निरञ्जनः ।
तद्वशादेव सर्वेषां सर्वदेहसमुद्भवः ।
एकः सन् भिद्यते शक्त्या मायया न स्वभावतः ।।
तस्मादद्वैतमेवाहुः मुनयः परमार्थतः ।
यदा पश्यति चात्मानं केवलं परमार्थतः ।
मायामात्रं तदा सर्वं जगद्भवति निर्वृतः" ।।

In the Padma Purāṇa we find :

"अनाद्यविद्यया दृष्टे जीवे मरणजन्मनी ।
देहस्यात्मन्यहं बुद्धया मन्येते नहि तत्र ते ।।
तन्निवृत्तौ स तद्ब्रह्म शुद्धं रूपविवर्जितम् ।
नित्यं विज्ञानमानन्दं स्वभासा भासयज्जगत् ।।
अतीतमिन्द्रियेभ्यस्तत्स्वप्रकाशकमात्मदृक् ।
अविषयं मनोदूरं बुद्धेरपि न गोचरम्" ।।

In the Varāha Purāṇa (वराहपुराणे) we find :

"परमात्मा स्वयं भूतैः क्रीडते भगवान् स्वयम् ।
कृत्वा मायावली मन्त्रैस्तद्वदेतन्न संशयः ।।
अहम्भावस्सदा ब्रह्मत्र विधेयो मुमुक्षुभिः ।
प्राणयाधारतं सर्वं जगदेतद्विचेष्टितम् ।
तत्राहमिति यः शब्दः स साधुत्वं न गच्छति" ।
"तस्मात्त्वमपि राजेन्द्र देवं नारायणं प्रभुम् ।
अभेदेन स्वदेहे तु पश्यत्वाराधयन् प्रभुम्" ।।

THE ŚIVA PURĀṆAS (शिवपुराणानि)

In the Sūtasamhita (सूतसंहिता) which directly bears the name of Sūta, the narrator of all the eighteen Purāṇas, and as such, is believed to contain the essence of all the eighteen Purāṇas, we find the idea clearly brought out that there is only one Pāramārthika Tattva, that there is no second (Dvitīyam) and that all perception of differences is due to the working of the mind.

"व्यवहारदृशा माया कल्पना नैव वस्तुतः ।
वस्तुतः परमाद्वैतं ब्रह्मैवास्ति न चेतरत् ।।
मायारूपतया साक्षाद्ब्रह्मैव प्रतिभासते ।
जगज्जीवादिरूपेणाप्यहो देवस्य वैभवम् ।।
स्वस्वरूपातिरेकेण ब्रह्मणो नास्ति किञ्चन ।
तथापि स्वातिरेकेण भाति हा दैववैभवम् ।।
जगदात्मतया पश्यन् बध्यते न विमुच्यते ।
सर्वमेतत्परं ब्रह्म पश्यन् स्वानुभवेन तु ।।
मुच्यते घोरसंसारात्सद्य एव न संशयः ।
द्विविधो वेदराशिस्तु मुनयस्संशितव्रताः ।
सत्याद्वैतपरः कश्चित् वेदभागस्समासतः ।
कल्पितद्वैतनिष्ठस्तु वेदभागस्तथा परः ।
सत्यमेव सदाऽद्वैतमसत्यं द्वैतमास्तिकाः" ।।

"अध्यस्तं हि सदाद्वैतं दृश्यत्वाच्छुक्तिरूप्यवत्" ।

"तस्माद् द्वैतपरो भागः कल्पितो द्वैतगोचरः ।
अद्वैतं सर्वदा सत्यं भेदाभावात्कथंचन ।
अतो द्वैतं समध्यस्तमद्वितीये परात्मनि ।।
अद्वैतं परमानन्दं ब्रह्मवस्तु नचापरम् ।
यत्र प्रयोजनं तत्र श्रुतिर्मानमिति स्थितिः" ।।

"अतः प्रयोजनाभावाद्द्वैतं न प्रतिपाद्यते ।
अनूद्य द्वैतमद्वैतं प्रतिपादयति श्रुतिः" ।।

"आत्मभेदस्तथैवात्मब्रह्मभेदश्च सुव्रताः ।
उपाधिनैव क्रियते न स्वतो मुनिपुङ्गवाः ।।
घटाद्युपाधिसम्पर्कादाकाशस्य भिदा यथा" ।

"मायया मोहिता मर्त्यास्तं भेदेन विदुर्बुधाः ।।
जडाजडमिदं सर्वं तथा भाति परात्मनि ।

वीचीतरङ्गफेनाद्या यथा भान्ति महोदधौ ।।
महदादिविशेषान्तं जगद्भाति तथात्मनि" ।
"भेदकारणशून्यत्वाद्भेदाभावाच्च वस्तुतः ।।
तत्त्वंशब्दौ स्वतस्सिद्धे चिन्मात्रे पर्यवस्यतः ।
यः पदद्वयलक्ष्यार्थः तस्मिन्भेदः प्रकल्पितः ।।
मायाविद्यात्मकोपाधिभेदेनैव न वस्तुतः" ।
"जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चत्वेन भाति यत् ।
तद्ब्रह्माहममिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते ।।
सर्वमेतत् परं ब्रह्म पश्यन् स्वानुभवेन तु ।
मुच्यते घोरसंसारात्सद्य एव न संशयः" ।।
"तस्मादज्ञानमूलस्य संसारस्य क्षयो हरे ।
आत्मनस्तत्त्वविज्ञानात् तत्त्वं ब्रह्मैव केवलम्" ।।

In Śivagīta (शिवगीता) we find :

"न कर्मणामनुष्ठानैर्न दानैस्तपसापि वा ।
कैवल्यं लभते मर्त्यः किंतु ज्ञानेन केवलम्" ।।
"शिवश्शिवोऽहमस्मीति वादिनं यञ्च कञ्चन ।
आत्मना सह तादात्म्यभागिनं कुरुते भृशम्" ।।
"सुख्यहं दुःख्यहं चेति जीव एवाभिमन्यते ।
निर्लेपोऽपि परं ज्योतिः मोहितः शंभुमायया ।।
शुक्तौ रजतवद्विश्वं मायया दृश्यते शिवे ।
यतो विवेकज्ञानेन न कोऽप्यत्रास्ति दुःखभाक् ।।"

In the Mārkaṇḍeya (मार्कण्डेयपुराणम्) Purāṇa we read :

"सा मुक्तिर्ब्रह्मणा चैक्यमनैक्यं प्राकृतैर्गुणैः ।
यथाहि कानकं खण्डमपद्रव्यवदग्निना ।।
दग्धदोषं द्वितीयेन खण्डेनैक्यं व्रजेन्नृप ।
न विशेषमवाप्नोति तद्वद्योगाग्निना यतिः ।
निर्दग्धदोषस्तेनैक्यं प्रयाति ब्रह्मणा सह ।
तदाख्यस्तन्मयो भूतो न गृह्येत विशेषतः" ।।

"यथा जलं जलेनैक्यं निक्षिप्तमुपगच्छति ।
तथाऽऽत्मा साम्यमभ्येति योगिनः परमात्मनि" ।।

In the Iśvara (ईश्वरगीता) Gītā we find :

"यद्यात्मा मलिनोऽस्वच्छः विकारी स्यात्स्वरूपतः ।
नहि तस्य भवेन्मुक्तिर्जन्मान्तरशतेष्वपि ।।
अहं कर्ता सुखी दुःखी कृशस्स्थूलेति या मतिः ।
सा चाहङ्कारकर्तृत्वात् आत्मन्यारोपिता जनैः ।।
तस्मादज्ञानमूलो हि संसारस्सर्वदेहिनाम्" ।
"मन्यन्ते ये स्वमात्मानं विभिन्नं परमेश्वरात् ।।
न ते पश्यन्ति तं देवं वृथा तेषां परिश्रमः" ।
"एकस्स भिद्यते शक्त्या मायया न स्वभावतः ।।
तस्मादद्वैतमेवाहुः मुनयः परमार्थतः ।
भेदोऽव्यक्तस्वभावेन सा च मायात्मसंश्रया ।।
यथा च धूमसंपर्कान्नाकाशो मलिनो भवेत् ।
अन्तःकरणजैर्भावैरात्मा तद्वन्न लिप्यते" ।।
"यदा नदीनदा लोके सागरेणैकतां ययुः ।
तद्वदात्माऽक्षरेणासौ निष्कलेनैकतां व्रजेत्" ।।

In the Vāyupurāṇa (वायुपुराण) we read :

"जीवेश्वरब्रह्मभेदो निरस्तस्सूत्रनिर्णये ।"
"निरूपितं परं ब्रह्म श्रुतियुक्तिविचारतः ।।
अध्यस्तं सर्पवद्यत्र विश्वमेतत्प्रकाशते" ।
"विश्वस्मिन्नपि चान्वेति निर्विकारं च रज्जुवत् ।।
सम्यग्विचारितं यद्वत् फेनोर्मिबुद्बुदोदकम् ।
तथा विचारितं विश्वं ब्रह्म स्यान्न पृथग्भवेत् ।।
सर्वं ब्रह्मैव नानात्वं नास्तीति निगमा जगुः ।"
"यदज्ञानाज्जगद्भाति यस्मिञ्ज्ञाते जगन्नहि" ।।
"रज्जावहिर्मरौ वारि नीलिमा गगने यथा ।
असद्विश्वमिदं भाति यस्मिन्नज्ञानकल्पितम् ।।

मायया चित्रकारिण्या विचित्र गुणशीलया ।
ब्रह्माण्डचित्रमतुलं यस्मिन् भित्ताविवार्पितम्" ।।
"पुराणेष्वितिहासेषु सूत्रेष्वपि च नैकधा ।
अक्षरं ब्रह्म परमं सर्वकारणकारणम्" ।।

In the Devī Bhāgavata (देवीभागवत) (Skandha 1 Adhyāya 15) we find :

सर्वं खल्विदमेवाहं नान्यदस्ति सनातनम् ।

In the 18th Adhyāya of the same Skandha, we read :

"जीवो ब्रह्म सदैवाहं नात्र कार्या विचारणा ।
भेदबुद्धिस्तु संसारे वर्तमाना प्रवर्तते ।।
अविद्येयं महाभाग विद्या चैतन्निवर्तनम् ।
विद्याविद्ये च विज्ञेये सर्वदैव विचक्षणैः ।।
विनाऽऽतपं च छायायां ज्ञायते हि कथं सुखम् ।
अविद्यया विना तद्वत् कथं विद्यां च वेत्ति वै" ।।

In the 3rd Skandha, 5th Adhyāya, we read :

'एकमेवाद्वितीयं यद्ब्रह्म वेदा वदन्ति हि' ।

In the 6th Adhyāya :

"दृश्यं च निर्गुणं लोके न भूतं न भविष्यति ।
निर्गुणः परमात्माऽसौ न तु दृश्यः कदाचन" ।।

In the 4th Skandha, 14th Adhyāya, we read :

"पञ्चकोशान्तरगते पुच्छब्रह्मस्वरूपिणि ।"

In the 7th Skandha, 28th Adhyāya, we read :

"'नमः कूटस्थरूपायै' 'नेतिनेतीति वाक्यैर्यद्बोध्यते सकलागमैः ।' "

In the 31st Adhyāya, we read :

"पुनस्त्वंपदलक्ष्यार्था प्रत्यगर्थस्वरूपिणी" ।।

In the 32nd Adhyāya, we read :

"तस्या जडत्वं दृश्यत्वात् ज्ञाननाशात्ततोऽसती ।
चैतन्यस्य न दृश्यत्वं दृश्यत्वे जडमेव तत् ।।
स्वप्रकाशं च चैतन्यं न परेण प्रकाशितम् ।
अतएव च नित्यत्वं सिद्धं संवित्तनौ मम ।।
आनन्दरूपता चास्याः परप्रेमास्पदत्वतः ।
मा न भूवं हि भूयासमिति प्रेमात्मनि स्थितम् ।।
सर्वस्यान्यस्य मिथ्यात्वादसङ्गत्वं स्फुटं मम" ।

In the 34th Adhyāya,

"प्रकृतं शृणु राजेन्द्र परमात्माऽत्र जीवताम् ।
उपाधियोगात्संप्राप्तः कर्तृत्वादिकमप्युत ।।
अज्ञानमेव मूलं स्यात्ततः कामस्ततः क्रिया ।
तस्मादज्ञाननाशाय यतेत नियतं नरः ।।"
"तत्त्वमस्यादिवाक्यं तु जीवब्रह्मैक्यबोधकम् ।
ऐक्ये ज्ञाते निर्भयस्तु मद्रूपो हि प्रजायते ।।
तत्पदस्य च वाच्यार्थो गिरेऽहं परिकीर्तितः ।
त्वंपदस्य च वाच्यार्थो जीव एव न संशयः ।।
उभयोरैक्यमसिना पदेन प्रोच्यते बुधैः" ।

In the 11th Skandha, we read :

"अहं देवि न चान्यो हि ब्रह्मैवाहं न शोकभाक् ।
सच्चिदानन्दरूपोऽहं स्वात्मानमिति चिन्तयेत्" ।।

In the Brahmāṇḍa Purāṇa, Lalitā Sahasranāma, we find the following names which are Advaidic in their import :—

"तत्पदलक्ष्यार्था, अदृश्या, दृश्यरहिता, निर्द्वैता, द्वैतवर्जिता, ब्रह्मात्मैक्यस्वरूपिणी, सर्वोपाधिविनिर्मुक्ता, तत्त्वमर्थस्वरूपिणी, मिथ्याजगदधिष्ठाना, नामरूपविवर्जिता, पञ्चकोशान्तरस्थिता, अप्रमेया, स्वप्रकाशा, मनोवाचामगोचरा" etc.

THE BHĀGAVATA (भागवतम्)

That the Bhāgavata treats of the highest Advaita philosophy cannot be denied. It is called aptly the Paramahaṁsa Saṁhitā. At the beginning, in the middle and at the end, it treats of the identity of the Individual soul with the Supreme Brahman.

"आदिमध्यावसानेषु वैराग्याख्यानसंयुतम् ।
हरिलीलाकथाव्रातामृतानन्दितसत्सुरम् ।
सर्ववेदान्तसारं यद्ब्रह्मात्मैकत्वलक्षणम् ।
वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनम्" ॥

In the first verse of the Purāṇa itself the illusion of the Dvaita world made up of the three gunas is well expounded.

तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा ।

In the 2nd Skandha (Adhyāya 9 verses, 32-33) Śrī Bhagavān himself says to Brahma

अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् ।
पश्चादहं तदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥

The definition of Māyā is given as "that which appears without the real object and vanishes with the realizaion of the Ātmā i.e. the subject".

ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि ।
तद्विद्यादात्मनो मायां यथाभासो यथा तमः ॥

In the 3rd Skandha (Adhyāya 31) we find :

यस्त्वत्र बद्ध इव कर्मभिरावृतात्मा भूतेन्द्रियाशयमयीमवलम्ब्य मायाम् ।
आस्ते विशुद्धमविकारमखण्डबोधमातप्यमानहृदयेऽवसितं नमामि ॥

Kapila's discourses addressed to his mother Devahūti, in the 3rd skandha, are full of Advaita's truths.

In the fourth Skandha, Dhruva exclaims :

एकस्त्वमेव भगवन्निदमात्मशक्त्या मायाख्ययोरुगुणया महदाद्यशेषम् ।
सृष्ट्वाऽनुविश्य पुरुषस्तदसद्गुणेषु नानेव दारुषु विभावसुवद्विभासि ॥

In the 22nd Adhyāya of the same Skandha Śrī Sanatkumāra teaches Pṛthu :

यस्मिन्निदं सदसदात्मतया विभाति मायाविवेकविधुति स्रजिवाऽहिबुद्धिः ।
तं नित्यमुक्तपरिशुद्धविबुद्धतत्त्वं प्रत्यूढकर्मकलिलप्रकृतिं प्रपद्ये ॥

Jaḍabharata's advice to Rahūgaṇa in the 5th Skandha is again brisking with Advaitic truths.

In the 6th Skandha 16th Adhyāya, Śrī Bhagavān says to Citra Ketu :

"यथा सुषुप्तः पुरुषो विश्वं पश्यति चात्मनि ।
आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः ॥
एवं जागरणादीनि जीवस्थानानि चात्मनः ।
मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत् ॥
येन प्रसुप्तः पुरुषः स्वापं वेदात्मनस्तदा ।
सुखं च निर्गुणं ब्रह्म तमात्मानमवेहि माम्" ॥

In the 7th Skandha, Prahlāda says :

एकस्त्वमेव जगदेतदमुष्य यत्त्वमाद्यन्तयोः पृथगवस्यसि मध्यतश्च ।
सृष्ट्वा गुणव्यतिकरं निजमाययेदं नानेव तैरवसितस्तदनुप्रविष्टः ॥

Coming to the 10th Skandha, we find in the 2nd Adhyāya, Brahma extolling the unborn Kṛṣṇa in the words :

त्वमेक एवास्य सतः प्रसूतिस्त्वं सन्निधानं त्वमनुग्रहश्च ।
त्वन्मायया संवृतचेतसस्त्वां पश्यन्ति नाना न विपश्चितो ये ॥

In the 3rd Adhyāya, Devakī says :

रूपं यत् तत् प्राहुरव्यक्तमाद्यं ब्रह्म ज्योतिर्निर्गुणं निर्विकारम् ।
सत्तामात्रं निर्विशेषं निरीहं सत्वं साक्षाद् विष्णुरध्यात्मदीपः ॥

The whole of the 14th Adhyāya, the Brahma Stuti, is only an elaboration of Advaita Truths. We here cite only some Ślokas from the chapter :

"तस्मादिदं जगदशेषमसत्स्वरूपं स्वप्नाभमस्तधिषणं पुरुदुःखदुःखम् ।
त्वय्येव नित्यसुखबोधतनावनन्ते मायात उद्यदपि यत् सदिवावभाति" ॥
"आत्मानमेवात्मतया विजानतां तेनैव जातं निखिलं प्रपञ्चितम् ।
ज्ञानेन भूयोऽपि च तत् प्रलीयते रज्ज्वामहेर्भोगभवाभवौ यथा ॥
अज्ञानसंज्ञौ भवबन्धमोक्षौ द्वौ नाम नान्यौ स्त ऋतज्ञभावात् ।
अजस्रचित्यात्मनि केवले परे विचार्यमाणे तरणाविवाहनी" ॥
"अन्तर्भवेऽनन्त भवन्तमेव ह्यतत्त्यजन्तो मृगयन्ति सन्तः ।
असन्तमप्यन्त्यहिमन्तरेण सन्तं गुणं तं किमु यन्ति सन्तः" ॥

In the 87th Adhyāya, in the Śruti Gītā we find many Ślokas stating that all duality is due to ignorance and is consequetsly false :

"जनिमसन्तस्सतो मृतिमुतात्मनि ये च भिदां विपणमृतं स्मरन्त्युपदिशन्ति त आरुपितैः।
त्रिगुणमयः पुमानिति भिदा यदबोधकृता त्वयि न ततः परत्र स भवेदवबोधरसे" ।।
"न यदिदमग्र आस न भविष्यदतो निधनादनुमितमन्तरा त्वयि विभाति मृषैकरसे।
अत उपमीयते द्रविणजातिविकल्पपथैः वितथमनोविलासमृतमित्यवयन्त्यबुधाः" ।।

When Parīkṣit asked Śuka how it was there was such a tremendous intensification of love in the Gopas towards their children in Bṛindāvana at the time of the Vastrāpāharaṇa by Brahma, Śrī Śuka replies :

"सर्वेषामपि भूतानां नृप स्वात्मैव वल्लभः।
इतरेऽपत्यवित्ताद्यास्तद्वल्लभतयैव हि" ।।
"तस्मात्प्रियतमः स्वात्मा सर्वेषामपि देहिनाम्।
तदर्थमेव सकलं जगदेतच्चराचरम् ।।
कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्।
जगद्धिताय सोऽप्यत्र देहीवाभाति मायया ।।
वस्तुतो जानतामत्र कृष्णं स्थास्नु चरिष्णु च।
भगवद्रूपमखिलं नान्यद्वस्त्विह किञ्चन" ।।

In the 11th Skandha, 2nd Adhyāya, Śrī Śuka, speaking of the Navayogis, says :

"त एते भगवद्रूपं विश्वं सदसदात्मकम्।
आत्मनोऽव्यतिरेकेण पश्यन्तो व्यचरन्महीम्" ।।

In the same Skandha Kavi one of the Navayogis says to Nimi :

"भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययोऽस्मृतिः।
तन्माययातो बुध आभजेत्तं भक्त्यैकयेशं गुरुदेवतात्मा ।।
अविद्यमानोऽप्यवभाति हि द्वयोः ध्यातुर्धिया स्वप्नमनोरथौ यथा।
तत्कर्म संकल्पविकल्पकं मनो बुधो निरुन्ध्यादभयं ततः स्यात्" ।।

In the 28th Adhyāya of the same Skandha, Śrī Kṛṣṇa says to Uddhava :

"किं भद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियत्।
वाचोदितं तदनृतं मनसा ध्यातमेव च ।।
छायाप्रत्याह्वयाभासा ह्यसन्तोऽप्यर्थकारिणः।
एवं देहादयो भावा यच्छन्त्यामृत्युतो भयम्" ।।

"प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा।
आद्यन्तवदसज्ज्ञात्वा निःसङ्गो विचरेदिह" ।।
"अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते।
ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा" ।।

The reality of the Ātmā and the falsity of the Dvaita Prapañcha is expounded by Śrī Kṛṣṇa in the following ślokas :

"यथा हिरण्यं स्वकृतं पुरस्तात्पश्चाच्च सर्वस्य हिरण्मयस्य।
तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत् ।।
विज्ञानमेतत्त्रियवस्थमङ्ग गुणत्रयं कारणकार्यकर्तृ।
समन्वयेन व्यतिरेकतश्च येनैव तुर्येण तदेव सत्यम् ।।
न यत्पुरस्तादुत यन्न पश्चान्मध्ये च तन्न व्यपदेशमात्रम्।
भूतं प्रसिद्धं च परेण यद्यत्तदेव तत्स्यादिति मे मनीषा ।।
अविद्यमानोऽप्यवभासते यो वैकारिको राजससर्ग एषः।
ब्रह्म स्वयंज्योतिरतो विभाति ब्रह्मेन्द्रियार्थात्मविकारचित्रम्" ।

In the 12th Skandha, towards the close of Śrī Śuka's narrative, Śrī Śuka gives the final advice to king Parīkṣit in the following words :

"अहं ब्रह्म परं धाम ब्रह्माहं परमं पदम्।
एवं समीक्षन्नात्मानमात्मन्याधाय निष्कले ।।
दशन्तं तक्षकं पादे लेलिहानं विषाननैः।
न द्रक्ष्यसि शरीरं च विश्वं च पृथगात्मनः" ।।

(K) THE ĀGAMAS (आगम)

The Āgamas are divided into Śaiva, Śakta and Vaiṣṇava Āgamas. The Vaiṣṇava Āgamas are again divided into Pāñcharatra and Vaikhānasa Āgamas.

ŚAIVĀGAMAS (शैवागम)

Some of the Śaivagamas begin with the teaching of the difference between the Jīva and Śiva. They then dwell upon Bheda (difference) which is essential for devotion and finally declare the highest reality, namely, the identity of the Jīva and Śiva.



Sri Parvati Parameswara


Sri Manickavachaka


Sri Tirugnanasambandha


Sri Sundaramurthi Nayanar


Sri Appar

The Sarvajñānottarāgama says :

"साधनेन स्वतो जीवो न शिवस्सर्वथा भवेत् ।
स्वतोऽशिवदशिवस्साक्षान्न भवेत्तु कदाचन ॥
शिव एव स्वतस्साक्षात् शिवो भवति नान्यथा ।
केचित्सामान्यमद्वैतं वदन्ति भ्रान्तचेतसः ॥
विशेषाद्वैतमाश्रित्य न तेषामस्ति वेदनम् ।
द्वैतमेवास्ति सर्वस्य प्रवदन्ति हि केचन ॥
न ते मनुष्याः कीटाश्च पतङ्गाश्च घटा हि ते ।
भेदे सति भवेदैक्यमिति चेत्तन्न संगतम्" ॥
"अहमात्मा शिवो ह्यन्यः परमात्मेति यस्स्मृतः ।
एवं योपासयेन्मोहान्न शिवत्वमवाप्नुयात् ॥
शिवोऽन्यस्त्वहमेवान्यः पृथग्भावं विवर्जयेत् ।
यश्शिवस्सोऽहमेवेति ह्यद्वयं भावयेत्सदा ॥
एवमेकात्मभावेन संस्थितस्य तु योगिनः ।
सर्वज्ञत्वं प्रकाशेत विकल्परहितस्य तु ॥
आत्मलाभात्परो लाभः क्वचिदन्यो न विद्यते ।
तदात्मनमुपासीत योऽयमात्मा परस्तु सः" ॥

In Saravajñānottara we also read :

"संसारार्णवमग्नानां भूतानां शरणार्थिनाम् ।
नान्यश्शरणदः कश्चिदात्मज्ञानादृते क्वचित्" ॥

In Suprabhedāgama we find :

"यथा जलं जले क्षिप्तं क्षीरे क्षीरं घृते घृतम् ।
अविशेषं भवेत्तद्वदात्मापि परमात्मनि" ॥

In the Mālinī Vijaya (मालिनीविजय) Tantra (belonging to the Kāśmīr Śaivism) we find :

"मलमज्ञानमिच्छन्ति संसाराङ्कुरकारणम् ।
अज्ञानाद्बध्यते लोकस्ततस्सृष्टिश्च संसृतिः" ॥

The Vijñāna Bhairava Tantra (विज्ञानभैरवतन्त्र) states that the appearance of the world is like Indrajāla i.e., legerdemain.

"इन्द्रजालमयं विश्वं न्यस्तं वा चित्रकर्मवत् ।
जलस्येवोर्मयो वह्नेर्ज्वालाभङ्गयः प्रभा रवेः ॥
ममैव भैरवस्यैता विश्वभङ्गयो विभेदिताः" ।

In the Kulayukti Tantra (कुलयुक्तितन्त्रे) we find :

"वेदान्ते वैष्णवे शैवे सौरे बौद्धेऽन्यतोऽपि च ।
एक एव परस्त्वात्मा ज्ञाता ज्ञेयं महेश्वरि" ॥

We see here a clear statement that the Vedānta, the Vaiṣṇava, the Śaiva, the Saura and the Bauddha schools view the Supreme Being as being identical with the knower and the known. The Sarvajña Bhairava Tantra (सर्वज्ञभैरवतन्त्र) clearly explains the Advaitic conception of Mokṣa, namely that Mokṣa is not a place to be reached. It is only the cutting of the knot of ignorance.

"नान्यत्र गमनं स्थानं मोक्षोऽस्ति सुरसुन्दरि ।
अज्ञानग्रन्थिभेदो यः स मोक्ष इति कथ्यते" ॥

In the Saṁvitprakāsa Tantra (संवित्प्रकाशतन्त्र) we read :

"इति निर्मलबोधैकरूपे दोषपरिग्रहः ।
विवर्तपरिणामाभ्यां द्वाभ्यामप्युपपद्यते ॥
विवर्तोऽपि तथारूपस्तथाभासित्वमच्युतः ।
परिणामी स एव त्वं सुवर्णमिव कुण्डले ।
मायात्वमेतदेव स्यान्नाशस्तत्त्वप्रदर्शनात् ।
नाहिरज्ञातरज्ज्वात्मा सर्पादीन्मन्यते पुनः" ॥

THE ŚĀKTĀGAMAS (शाक्तागमाः)

In the Kulacūḍāmaṇi Tantra, Devī says to Śiva

"न कार्यं नादि यत्किंचित् ब्रह्माहं स्फुरितप्रभम् ॥
कार्यभावसमापन्ना यदाऽहं विश्वरूपिणी" ॥
"शिवशक्तिसमायोगात् जायते सृष्टिकल्पना ।
शिवशक्तिमयं सर्वं यत्किंचिज्जगतीगतम्" ॥
"तदा त्वमेव सर्वत्र सर्वत्राहं महेश्वर ।
सर्वं त्वमेव देवेश सर्वं चाहं सनातन ॥"

In the Kālivilāsa Tantra (कालीविलासतन्त्रं) we read :

अद्वैतरूपिणी आद्या असिता अणिमा तथा ।।

The Kulārṇava Tantra (कुलार्णवतन्त्र) reads :

"अस्ति देवि परब्रह्मस्वरूपी निष्कल: शिव: ।
सर्वज्ञ: सर्वकर्ता च सर्वेशो निर्मलोऽद्वय: ।।
स्वयं ज्योतिरनाद्यन्तो निर्विकार: परात्पर: ।
निर्गुणस्सच्चिदानन्दस्तदंशा जीवसंज्ञका: ।
अनाद्यविद्योपहिता: यथाऽग्नौ विस्फुलिंगका:" ।।

In the Paraśurāma Kalpa Sūtra (परशुरामकल्पसूत्रं) we read :

"शरीरकञ्चुकितश्शिवो जीव: । निष्कञ्चुकश्शिव: परमेश्वर:" ।

In the Mahānirvaṇa Tantra (महानिर्वाणतन्त्रं) we find :

"स एक एव सद्रूप: सत्योऽद्वैत: परात्पर: ।
स्वप्रकाश: सदा पूर्ण: सच्चिदानन्दलक्षण: ।।
निर्विकारी निराधारो निर्विशेषो निराकुल: ।
गुणातीत: सर्वसाक्षी सर्वात्मा सर्वदृग्विभु: ।।
गूढ: सर्वेषु भूतेषु सर्वव्यापी सनातन: ।
सर्वेन्द्रियगुणाभास: सर्वेन्द्रियविवर्जित: ।।
तदधीनं जगत्सर्वं त्रैलोक्यं सचराचरम् ।
तदालम्बनकस्तिष्ठेदवितर्क्यमिदं जगत् ।।
तत्सत्यतामुपाश्रित्य सद्वद्भाति पृथक् पृथक्" ।।
"सच्छब्देन सदा स्थायि चिच्चैतन्यं प्रकीर्तितम् ।
एकमद्वैतमीशानि बृहत्वाद्ब्रह्म गीयते" ।।
"तत्त्वमसि महाप्राज्ञ हंस: सोऽहं विभावय ।
निर्ममो निरहंकार: स्वभावेन सुखं चर" ।।
"आब्रह्मस्तम्बपर्यन्तं सद्रूपेण विभावयन् ।
विस्मरन्नामरूपाणि ध्यायन्नात्मानमात्मनि" ।।
(विहरेत् क्षितौ)
"यथा सत्यमुपाश्रित्य मृषा विश्वं प्रतिष्ठति ।
आत्माश्रितस्तथा देहो जानन्नेवं सुखी भवेत् ।"
"सर्वं ब्रह्मणि सर्वत्र ब्रह्मैव परिपश्यति ।
ज्ञेय: स एव सत्कौलो जीवन्मुक्तो न संशय: ।।"

In the last chapter of this Tantra we find a very beautiful exposition of Advaita truths :

"ब्रह्मादितृणपर्यन्तं मायया कल्पितं जगत् ।
सत्यमेकं परं ब्रह्म विदित्वैवं सुखी भवेत् ।।
विहाय नामरूपाणि नित्ये ब्रह्मणि निश्चले ।
परिनिश्चिततत्त्वो य: स मुक्त: कर्मबन्धनात् ।।
न मुक्तिर्जपनाद्धोमादुपवासशतैरपि ।
